# Shri Bala Stotram 1

# श्रीबालास्तोत्रम् १

## Document Information

Text title : Shri Bala Stotram 1

File name : bAlAstotram1.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 22, 2020

*sanskritdocuments.org*

# श्रीबालास्तोत्रम् १

बालाम्बेति सुधापूरमाधुरीचोरमम्बिके ।
तव नामास्ति यत्तेन जिह्वा मे मधुमत्तमा ॥

जगत्पवित्रि मामिकामपाहराशु दुर्जराम् ।
प्रसीद मे दयाधुने प्रशस्तिमम्ब नस्कृधि ॥

सन्ति विद्या जगत्यस्मिन् संसारभ्रमहेतवः ।
भजेऽहं त्वां यया विद्वान् विद्ययाऽमृतमश्नुते ॥

कुर्वे गर्वेणापचारानपाराण् यद्यप्यम्ब त्वत्पदाब्जं तथापि ।
मन्ये धन्ये देवि विद्यावलम्बं मातेव पुत्रं बिभृतास्वेनम् ॥

यथोपास्तिक्षतिर्न स्यात्तव चक्रस्य सुन्दरि ।
कृपया कुरु कल्याणी तथा मे स्वस्तिरायुषी ॥

सुकुमारि सुखाकारे सुनेत्रे सूक्ष्ममध्यमे ।
सुप्रसन्ना भव शिवे सुमृडीका सरस्वती ॥

नवनीपवनीवास लालसोत्तरमानसे ।
शृङ्गारदेवते मातः श्रियं वासय मे कुले ॥

वन्दे मातरमम्बिकां भगवतीं वाणीरमासेवितां
कल्याणीं कमनीयकल्पलतिकां कैलासनाथप्रियाम् ।
वेदान्तप्रतिपाद्यमानविभवां विद्वन्मनोरञ्जनीं
श्रीचक्राञ्चितचक्रपीठनिलयां श्रीराजराजेश्वरीम् ॥

कुन्दमुकुलाग्रन्तां कुङ्कुमपङ्केन लिप्ततनुमध्याम् ।
आरक्तदेहकान्तिं बालामखिलाण्डनायिकां वन्दे ॥

ऐङ्कारासनगर्भितानलशिखां शौक्लिं कला बिभ्रतीं
सौवर्णाम्बरधारिणीं वरसुधाधौतान्तरङ्गां शिवाम् ।

वन्दे पुस्तकमङ्कुशं जपवटीं पाशं मुदा बिभ्रतीं
त्वां बालां त्रिपुरां परात्परकलां षड्चक्रसञ्चारिणीम् ॥

बालार्कायुततेजसं त्रिणयनां रक्ताम्बरोल्लासिनीं
नानालङ्कृतिराजमानवपुषं बालोडुराङ्शेखराम् ।
हस्तैरिक्षुधनुः सृणिं सुमशरं पाशं मुदा बिभ्रतीं
श्रीचक्रस्थितसुन्दरीं त्रिजगतामाधारभूतां भजे ॥

इति श्रीबालास्तोत्रम् (१) सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Bala Stotram 1*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*